# संस्कृत-वार्ता:

दिनाङ्कः-30.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- बिहार-विधानसभा-निर्वाचनस्य प्रथम-चरणस्य मतदानाय विविध-राजनीति-दलानि प्रचारकार्ये रतानि सन्ति ।
- भारतं पाकिस्तानसमर्थितं आतङ्कवादं विरुध्य तस्य निन्दाम् अकरोत् । प्रोदीरयत् यत् इस्लामाबादेन प्रायोजितं आतङ्कवादं प्रतिवेशिनः देशाः अस्वीकुर्वन्ति ।
- विदेश-कार्यमन्त्री डा. एस्. जयशङ्करः अद्य साईप्रस्-देशस्य स्वकीयं समकक्षं सम्मिल्य तस्य देशस्य सार्वभौमत्वं, ऐक्यं, प्रादेशिक-अखण्डतां च प्रति भारतस्य अविचलसमर्थनं पुनरुद्घाटितवान् ।
- अमेरिकया डॉनल्डट्रम्पः शीजिनपिंग इत्यनयोः मेलनानंन्तरं चीनदेशस्य उपरि शुल्कं वर्तमानस्य सप्तपञ्चाशत्-प्रतिशन्मितात् अपचित्य सप्तचत्वारिंशत्-प्रतिशन्मितं य़ावत् कृतम् ।
- आईसीसी महिलाक्रिकेटक्रीडायाः एकदिवसीयविश्वचषके , नवी-मुंबय्यां द्वितीये प्रागुपान्त्यचक्रे भारतीयदलं ऑस्ट्रेलियादलं सम्मुखीकरोति ।

-----------------------------------------------

## बिहार-निर्वाचन-अभियानम्

बिहार-विधानसभा-निर्वाचनस्य प्रचारः प्रथम-चरणस्य मतदानात् पूर्वमेव तीव्रः अभवत्। एन्. डी. ए.-दलं, महाघटबन्धनदलानि च परस्परं आरोपं प्रख्यापयन्ती मतदातृन् आकर्षयितुं सर्वान् प्रयत्नान् कुर्वन्ती सन्ति । बिहारस्य मुज़फ़्फ़रपुरे निर्वाचनसमारोहं सम्बोधयन् भाजपा-दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत्, बिहारस्य जनानां कृते शिक्षां, स्वास्थ्यसेवां, सिञ्चनक्षेत्रे च पर्याप्तावसरान् सुनिश्चेतुं एन्. डी. ए.दलं प्रतिबद्धम् अस्ति । सः

अवदत् यत् सर्वकारः बिहारतः प्रवाससमस्यां निवारयितुं, राज्ये पर्याप्ताजीविका-अवसरान् निर्मातुं च उपायान् करिष्यति ।

विपक्षस्य आर्. जे. डी. , काङ्ग्रेस्-दलयोः उपरि, तेषां कार्यकाले बिहारराज्ये कुशासनस्य आरोपं प्रख्याप्य, मोदी-वर्यः उक्तवान् यत् तेषां शासनकाले राज्ये कीदृशः अपि विकासः न अभवत् अपरत्र भ्रष्टाचारः एव सर्वत्र व्याप्तः आसीत् । छठ्-पर्वणः विषये आर्. जे. डी. ,काङ्ग्रेस्-दलयोः प्रतिकूल-टिप्पण्यः अपि प्रधानमन्त्री निन्दाम् अकरोत् । सः अवदत् यत्, बिहारस्य जनाः एतत् अपमानम् न सहिष्यन्ति ।

अपरत्र, महाघटबन्धन् इत्यस्य मुख्यमन्त्रीपदस्य प्रत्याशिः तेजस्वी यादवः आरोपं प्राख्यापयत् यत् राजनैतिकदलानि मतानां कृते बिहारस्य शोषणं कुर्वन्ति, गुजरातराज्ये उद्योगान् च स्थापयन्ति। सः एतादृशानि दलानानि पुनः सत्ताप्राप्तितः विमुखानि कर्तुं बिहारस्य जनान् प्रार्थयत् ।

-----------------------------------------------------

<u>विदेशमन्त्रालयः-विवरणम्</u>

विदेशमन्त्रालयः अद्य अवदत् यत् भारतम् अमेरिका-पक्षेन सह व्यापार-सन्धिं समाधातुं निरन्तरम् संलग्नम् अस्ति । अद्य अपराह्णे नवदिल्ल्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः अवदत् यत् द्वौ एव पक्षौ अस्मिन् विषये चर्चां निरन्तरं कुर्वन्तौ स्तः। सः अकथयत् यत् भारतीयपक्षः रूसदेशस्य तैलोद्योगसंस्थानेषु सद्यः एव अमेरिकादेशस्य प्रख्यापितानां प्रतिबन्धाणां प्रभावस्य अध्ययनं कुर्वन् अस्ति । सः अवदत् यत् नवदिल्ल्याः निर्णयाः स्वाभाविकतया वैश्विकविपण्यः विकसितां गतिशीलतां अवलम्बन्ते । सः अवदत् यत् ऊर्जा-स्रोतस्य बृहत्तरप्रश्ने भारतस्य स्थितिः सर्वविदिता अस्ति तथा च देशःएक-दशमलव-चतुः-शतकोटिजनानां ऊर्जा-सुरक्षायाः आवश्यकतां पूरयितुं विविधस्रोतेभ्यः सुलभ-ऊर्जा-सुरक्षायाः अनिवार्यता सुनिश्चेष्यति । पाकिस्तान्-अफ्गानिस्तान् इत्येतयोः विषये प्रश्नस्य

प्रत्युत्तरे प्रवक्ता अवदत् यत्, अफगानिस्तान् स्वक्षेत्रेषु सार्वभौमत्वस्य प्रयोगं कुर्वन् अस्ति येन पाकिस्तानदेशः क्रुद्धः अस्ति।

सः अवदत् यत् पाकिस्तान्-देशः प्रतीयते यत् पारेसीमं आतङ्कवादं आचरितुम् तस्य अधिकारः , परञ्च तस्य प्रतिवेशिनः एतत् अस्वीकारं कुर्वन्ति । सः अवदत् यत् भारतं अफगानिस्तान्-देशस्य सार्वभौमत्वं, प्रादेशिक-अखण्डतां, स्वातन्त्र्यं च प्रति पूर्णतया प्रतिबद्धं अस्ति । अन्यस्य प्रश्नस्य प्रत्युत्तरे श्रीजायस्वालः अवधानं दत्तवान् यत् भारतं अफगानिस्तान-देशस्य स्थायीजलप्रबन्धनाय, जलविद्युत-परियोजनायै च समर्थनं दातुं सज्जम् अस्ति।

---------------------------------------------------

## जयशङ्कर-साईप्रस्-वित्तमन्त्र्युपवेशनम्

विदेश-कार्यमन्त्री डा. एस्. जयशङ्करः अद्य साईप्रस्-देशस्य सार्वभौमत्वं, ऐक्यं, प्रादेशिक-अखण्डतां च प्रति भारतस्य अविचलसमर्थनं पुनरुद्धाटितवान् । सः प्रासङ्गिक-संयुक्तराष्ट्र-सुरक्षा-परिषद्-प्रस्तावानाम् अनुगुणं राजनैतिक-समानतया सह द्वि-मण्डल-द्विसाम्प्रदायिक-सङ्घस्य कृते अपि प्रतिबद्धताम् प्रकटितवान्। डा. जयशङ्करः अद्य नवदिल्ल्यां साईप्रस्-देशस्य समकक्षीयेन डा. कान्स्टान्टिनोस् कोम्बोस् इत्यनेन सह मेलनसमये एताः टिप्पण्याः अकरोत् । डा. जयशङ्करः अवदत् यत्, अस्मिन् वर्षे जूनमासे प्रधानमन्त्रिणः नरेद्रमोदीवर्यस्य साईप्रस्-देशस्य यात्रावधौ समग्र-सहभागित्वस्य कार्यान्वयनविषये एक संयुक्तघोषणा जाता आसीत्।

---------------------------------------------------

## ट्रम्प-टैरिफ

अद्य अमेरिकादेशस्य राष्ट्रपतिना डोणाल्ड् ट्रम्पः इत्यनेन चीनदेशस्य उपरि शुल्कस्य घोषणा कृता यस्यानन्तरं शुल्कं वर्तमानस्य सप्तपञ्चाशत्-प्रतिशन्मितात् अपचित्य सप्तचत्वारिंशत्-प्रतिशन्मितं य़ावत् भविष्यति। दक्षिणकोरिया-देशस्य बुसान्-नगरे चीन-देशस्य राष्ट्रपतिना सी-जिन्पिङ्ग्-इत्यनेन सह सम्मिल्य ट्रम्प्-वर्यः अवदत् यत् चीनदेशः अमेरिका-देशात् तत्क्षणमेव सोयाबीन्-

धान्यं क्रेतुम् आरभते । ट्रम्पः अकथयत् यत् चीनदेशस्य उपरि फेण्टानिल् इति शुल्कं विंशति-प्रतिशन्मिततो अपचित्य दश-प्रतिशन्मितं यावत् न्यूनं भविष्यति ।

---------------------------------------------------

**अमित-शाहः**

केन्द्रीय-गृह-मन्त्री अमित-शाहः अद्य अवदत् यत् राष्ट्रिय-एकता-दिवसस्य अवसरे एक-भारत-श्रेष्ठ-भारत इत्यस्य प्रतीकभूतस्य भव्य-एकता-परेड् इत्यस्य उद्घाटनं श्वः प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य केवडिया-नगरे करिष्यति । सः अवदत् यत् प्रतिवर्षं अक्टूबर-मासस्य एकत्रिंशत्-दिनाङ्के एकता-नगरे अस्य आयोजनं भविष्यति । पटना-नगरे पत्रकारसम्मेलनं सम्बोधयन् श्रीशाह-वर्यः अवदत् यत् प्रतिवर्षं नवदिल्ल्याम् आयोजितस्य गणतन्त्रदिवसस्य परेड-प्रदर्शनं इव , सरदार-वल्लभभाई-पटेलस्य पञ्चाशदुत्तरैकशत-तमस्य जन्मवार्षिकस्य कृते एतत् परेड-प्रदर्शनं अद्वितीयं भविष्यति । भगवान्-बिर्सा-मुण्डा-वर्यस्य जन्मवार्षिकस्य स्मरणार्थं एकता-नगरे एक-नवम्बर्-दिनाङ्कात् आरभ्य पञ्चदश-नवम्बर-पर्यन्तं भारतपर्वणः आयोजनं भविष्यति इति अपि शाह-वर्यः अघोषयत् ।

---------------------------------------------------

**महिला क्रिकेट::**

आईसीसी महिलाक्रिकेटक्रीडायाः एकदिवसीयविश्वचषके , नवी-मुंबय्यां द्वितीये प्रागुपान्त्यचक्रे भारतीयदलं ऑस्ट्रेलियादलं सम्मुखीकरोति ।

।। इति वार्ताः ।।